इति राजनिर्घण्टः ॥

इक्षुनेत्रं, क्ली, (इक्षोर्नेत्रं ।) इक्षुमूलं । इति राजनिर्घण्टः ॥

इक्षुपत्रः, पुं, (इक्षोः पत्त्रमिव तीक्ष्णं पत्त्रं यस्य ।) यावनालनामधान्यविशेषः । इति राजनिर्घण्टः ॥ जोयार इति भाषा ।

इक्षुप्रः, पुं, (इक्षुरिव पूर्य्यते । इक्षु+पृ+क ।) शरतृणं । इति राजनिर्घण्टः ॥ (शरतृणशब्देऽस्य गुणादयो ज्ञातव्याः ।)

इक्षुवालिका, स्त्री, (इक्षोर्वालिकेव तदाकृतित्वात् ।) इक्षुतुल्या । इति रत्नमाला ॥ खनाखु इति ख्याता । काशः । इति राजनिर्घण्टः ॥ काशिया इति भाषा ।

इक्षुमूलं, क्ली, (इक्षोः मूलमिव मूलं यस्य ।) वृक्षविशेषः । तत्पर्य्यायः । इक्षुनेत्रं २ मोरटकं ३ वंशनेत्रं ४ वंशमूलं ५ मोरटं ६ वंशपूरकं ७ । इति राजनिर्घण्टः ॥ ("अतीव मधुरो मूलः" इति सुश्रुतः ।)

इक्षुयोनिः, पुं, (इक्षोर्योनिरुत्पत्तिकारणं ।) पुण्ड्रकेक्षुः । इति राजनिर्घण्टः ॥ (तत्र पौण्ड्रकः । शैत्यप्रसादमाधुर्य्यैर्वरः, इति वाभटः । पौण्ड्रकशब्देऽस्य विशेषो ज्ञेयः ॥)

इक्षुरः, पुं, (इक्षुमिक्षुवत् गन्धं राति ददातीति । इक्षु+रा+क ।) कोकिलाक्षवृक्षः । इति रत्नमाला ॥ कुलिया खारा इति भाषा । इक्षुः । गोक्षुरकवृक्षः । इति शब्दरत्नावली ॥ काशः । इति राजनिर्घण्टः ॥

इक्षुरकः, पुं, (इक्षुर+स्वार्थे+क ।) कोकिलाक्षवृक्षः । स्थूलशरः । काशतृणं । इति राजनिर्घण्टः ॥ ("स्वयङ्गुप्तेक्षुरकयोः फलचूर्णं सशर्करम् । धारोष्णेन नरः पीत्वा पयसा न क्षयं व्रजेत्" ॥ इति सुश्रुतः ॥)

इक्षुरसः, पुं, (इक्षोरिव रसो यस्य ।) काशतृणं । इति भावप्रकाशः ॥ (इक्षुवृक्षस्य रसः । अस्य गुणाः क्रमेण यथा ; दन्तपीडितेक्षुरसगुणाः । जीवनहितकारित्वं, हिमत्वं, शुक्रकारित्वं, तृप्तिजनकत्वं, वायुरक्तपित्तनाशित्वं, स्वादुत्वं, रक्तवर्द्धकत्वं धातुवर्द्धकत्वञ्च यथा भावप्रकाशः ।

"दन्तनिष्पीड़ितस्येक्षो रसः पित्तास्रनाशनः ।
शर्करासमवीर्य्यः स्यादविदाही कफप्रदः" ॥

यन्त्रनिष्पीड़ितरसगुणाः, रक्तशुक्रकारित्वम्, शीतलत्वं, सारकत्वं, दाहजनकत्वं, किञ्चित् पित्तवायुनाशित्वं, क्षीरविष्टम्भदात्वकारित्वञ्च यथा, भावप्रकाशे,—

"मूलाग्रजन्तुजग्धादिपीड़नात् मलसंकरात् ।
किञ्चित्कालं विधृत्याच विकृतिं याति यान्त्रिकः ॥
तस्मात् विदाही विष्टम्भी गुरुः स्यात् यान्त्रिको रसः ।

पर्य्युषितेक्षुरसगुणाः । वान्तिहरत्वं, वातजनकत्वं, जाड्यप्रतिश्यायरोगदातृत्वं, कफवायुकारित्वञ्च । यथा भावप्रकाशे ।

"रसः पर्य्युषितो नेष्टो ह्यम्लो वातापहो गुरुः ।
कफपित्तकरः शोषी भेदनश्चातिमूत्रलः" ॥ * ॥

पक्वेक्षुरसगुणाः । गुरुत्वं । सुतीक्ष्णत्वं । कफवातनाशित्वं । स्निग्धत्वं । अतिपाके विदाहित्वं । पित्तास्रदोषशोषकारित्वञ्च । यथा भावप्रकाशे ।

"पक्वो रसो गुरुः स्निग्धः सुतीक्ष्णः कफवातनुत् ।
गुल्मानाहप्रशमनः किञ्चित् पित्तहरः स्मृतः" ॥*॥

इक्षुरसविकारगुणाः । यथा भावप्रकाशे ।

"इक्षोर्विकारा तृड्दाहमूर्च्छापित्तास्रनाशनाः ।
गुरवो मधुरा बल्याः स्निग्धा वातहराः सराः ।
वृष्या मोहहराः शीता वृंहणा विषहारिणः" ॥)

इक्षुरसक्वाथः, पुं, (इक्षुरसस्य क्वाथः ।) गुड़ः । इति हेमचन्द्रः ॥ (गुड़शब्देऽस्य गुणादयो व्याख्येयाः ।)

इक्षुरसोदः, पुं, (इक्षुरसवत् उदकं यस्य उदकस्य उदभावः ।) इक्षुसमुद्रः । इति जटाधरः ॥

इक्षुवल्लरी, स्त्री, (इक्षुरिव सुस्वादा वल्लरी ।) क्षीरविदारी । क्षीरकन्दः । इति राजनिर्घण्टः ॥

इक्षुवल्ली, स्त्री, (इक्षुरिव सुस्वादा वल्ली लता ।) क्षीरविदारी । इति राजनिर्घण्टः ॥

इक्षुवाटिका, स्त्री, पुण्ड्रकः । इति राजनिर्घण्टः । पुँड़ि आक इति भाषा ।

इक्षुवाटी, स्त्री, (इक्षोर्वाटीव ।) पुण्ड्रकः । इति राजनिर्घण्टः ।

इक्षुवेष्टनः, पुं (इक्षोरिव वेष्टनं यस्य ।) भद्रमुञ्जः । इति राजनिर्घण्टः ॥

इक्षुशाकटं, क्ली, (इक्षोः क्षेत्रं । इक्षुशब्दात् क्षेत्रे शकटशाकिनौ इति शाकटप्रत्ययः ।) इक्षुक्षेत्रम् । इति व्याकरणम् ॥ इक्षुर भूमि इति भाषा ।

इक्षुशाकिनं, क्ली, (इक्षोर्भवनं क्षेत्रं वा । इक्षु+शाकिन ।) इक्षुक्षेत्रं । इति व्याकरणम् ॥

इक्षुसारः, पुं, (इक्षोः सारः ।) गुड़ः । इति राजनिर्घण्टः ॥

इक्ष्वाकुः पुं, (इक्षुमाकरोतीति । इक्षु+आङ्+कृ+मितद्र्वादित्वात् डुः । यद्वा इक्ष इति शब्दं अकतीति अक गतौ बाहुलकादुण् ।) वैवस्वतमनुपुत्त्रः । स तु सत्ययुगे अयोध्यायां सूर्य्यवंशीयादिराजः । इति पुराणम् ॥ (गीतायाम् । ४ । १ ।

"विवस्वान् मनवे प्राह मनुरिक्ष्वाकवेऽब्रवीत्" ।

इक्ष्वाकोर्गोत्रे जाताः इति व्युत्पत्त्या वाच्यलिङ्गाः । इक्ष्वाकुवंशोद्भवाः । यथा रघुः । १।७२ ।

"इक्ष्वाकूणां दुरापेऽर्थे त्वदधीना हि सिद्धयः" ।)

इक्ष्वाकुः, स्त्री, (इक्षु+आङ्+कृ+डु ।) कटुतुम्बी । इत्यमरो मेदिनी च ॥ तितलाउ इति भाषा । ("इक्ष्वाकुकुसुमचूर्णं वा पूर्व्ववदेव क्षीरेण कासश्वासच्छर्द्दिकफरोगेषूपयोगः" । इति सुश्रुते ।

"सिद्धं वक्ष्याम्यथेक्ष्वाकुकल्पं येषां प्रशस्यते" ।

अस्याः पर्य्यायो यथा ।

"लम्बाऽथ कटुकालावुस्तुम्बी पिण्डफला तथा ।
इक्ष्वाकौ फलिनी चैव प्रोच्यते तस्य कल्पना" ॥

अस्या रोगविशेषे प्रशस्तता यथा ।

"कासश्वासविषच्छर्द्दिज्वरार्त्ते कफकर्षिते ।
प्रताम्यति नरे चैव वमनार्थं तदिष्यते" ॥

अवस्थाभेदेनास्या व्यवहारो यथा ।

"अपुष्पस्य प्रवालानां मुष्टिं प्रादेशसम्मिताम् ।
क्षीरप्रस्थे शृतं दद्यात् पित्तोद्रिक्ते कफज्वरे ॥
पुष्पादिषु च चत्वारः क्षीरे जीमूतके यथा ।
योगाहरितपाण्डूनां सुरामण्डेन पञ्चमः ॥
फलस्य रसभागञ्च त्रिगुणक्षीरसाधितम् ।
उरःस्थिते कफे दद्यात् स्वरभेदे सपीनसे ॥
हृतमध्ये फले जीर्णे स्थितं क्षीरं यदा दधि ।
जातं स्यात् कफजे कासे श्वासे वम्यां च तत्पिबेत् ॥
मस्तुना वा फलान्मध्यं पाण्डुकुष्ठविषार्द्दितः ।
तेन तक्रं विपक्वं वा सक्षौद्रलवणं पिबेत् ॥
अजाक्षीरेण वीजानि भावयेत् पाययेत च ।
विषगुल्मोदरग्रन्थिगण्डेषु श्लीपदेषु च ॥
तुम्ब्याः फलरसैः शुष्कैः सपुष्पैरवचूर्णितम् ।
छर्द्दयेन्माल्यमाघ्राय गन्धसम्पत्सुखोचितः ॥
भक्षयेत्फलमध्यं वा गुड़ेन पललेन च ।
इक्ष्वाकुफलतैलं वा सिद्धं वा पूर्व्ववद्घृतम् ॥
पञ्चाशद्भवृद्धानि फणादीनां यथोत्तरम् ।
पिबेद्विमृद्य वीजानि कषायेष्वासुतं पृथक् ।
यष्ट्याह्वकोविदाराद्यैर्मुष्टिमन्तर्नखं पिबेत् ॥
कषायैः कोविदाराद्यैर्मात्राऽस्य फलवत् स्मृताः ।
गुल्ममेहे प्रसेके च कल्कं मांसरसैः पिबेत् ॥
नरः साधु वमत्येवं न च दौर्ब्बल्यमश्नुते" ॥
"इक्ष्वाकुमूलं मदनं विशल्यातिविषे वचां ।
कुष्ठं किणवामिकौ चापि पिबेत्तुल्यानि पूर्व्ववत्" ॥)
इति चरकः ॥)

इक्ष्वारिः, पुं, (इक्षुवृक्षस्य अरिः ।) काशतृणं । इति राजनिर्घण्टः ॥ (काशशब्देऽस्य गुणादयो ज्ञातव्याः ।)

इक्ष्वालिकः, पुं, (इक्षुरिव अलति व्याप्नोतीति ।) काशतृणं । इति भावप्रकाशः ॥

इक्ष्वालिका, स्त्री, (इक्ष्वालिक+टाप् ।) इक्षुतुल्या । इति रत्नमाला ॥ खानाखु इति भाषा । खागड़ा इति केचित् ॥

इख, गतौ । (भ्वादिं-परं-सकं-सेट् ।) इति कविकल्पद्रुमः ॥ तृतीयस्वरादिः । एखति । इति दुर्गादासः ॥

इख, इ, गतौ । (भ्वादिं-परं-सकं-सेट्-इदित् ।) इति कविकल्पद्रुमः ॥ तृतीयस्वरादिः । इ, इङ्खते । इति दुर्गादासः ॥

इग, इ, गतौ । (भ्वादिं-परं-सकं-सेट्, इदित् ।) इति कविकल्पद्रुमः ॥ तृतीयस्वरादिः । इ, इङ्गति इङ्गितं । इति दुर्गादासः ॥ (यदुक्तं भारते ।

"त्वया सृष्टमिदं विश्वं यच्चेङ्गं यच्च नेङ्गति" ।

इङ्गं, त्रि, (इगि+क ।) अद्भुतं । जङ्गमं । इति मेदिनीकरहेमचन्द्रौ ॥ (यथा, भारते ।

("त्वया सृष्टमिदं विश्वं यच्चेङ्गं यच्च नेङ्गति" ।)

इङ्गः, पुं, (इङ्ग+घञ् ।) इङ्गितं । ज्ञानं । इति मेदिनीकरहेमचन्द्रौ ॥

इङ्गितं, क्ली, (इगि+क्त ।) अभिप्रायानुरूपचेष्टाविष्करणं । ठार सङ्केत इत्यादि भाषा । तत्पर्य्यायः । आकारः २ इङ्गः ३ । इत्यमरः ॥ गमनं । चेष्टा । इति हेमचन्द्रः ॥

("आकारैरिङ्गितैर्गत्या चेष्टया भाषणेन च ।
नेत्रवक्त्रविकारेण लक्ष्यतेऽन्तर्गतं मनः" ॥

हितोपदेशे सुहृद्भेदः । (तथाच रघुः २।२० ।)